# ॥ શ્રીબાલાત્રિપુરસુન્દરીસ્તોત્રમ્ ॥

.. Balatripurasundaristotram ..

sanskritdocuments.org

May 21, 2017

# .. Balatripurasundaristotram ..

# ॥ શ્રીબાલાત્રિપુરસુન્દરીસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : shrIbAlAtripurasundarIstotram

File name : bAlAtripurasundarIstotram.itx

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Pankaj Dubey dr.pankaj.dubey at gmail.com

Proofread by : Pankaj Dubey dr.pankaj.dubey at gmail.com

Description-comments : rudrayAmale bhairava-bhairavI saMvAde

Latest update : April 15, 2015

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 21, 2017

*sanskritdocuments.org*

# ॥ શ્રીબાલાત્રિપુરસુન્દરીસ્તોત્રમ્ ॥

॥ શ્રી બાલાત્રિપુરસુન્દર્યૈ નમઃ ॥

॥ પૂર્વપીઠિકા ॥

શ્રી ભૈરવ ઉવાચ
અધુના દેવિ ! બાલાયાઃ સ્તોત્રં વક્ષ્યામિ પાર્વતિ ! ।
પઞ્ચમાઙ્ગં રહસ્યં મે શ્રુત્વા ગોપ્યં પ્રયત્નતઃ ॥

॥ વિનિયોગ ॥

ॐ અસ્ય શ્રીબાલાત્રિપુરસુન્દરીસ્તોત્રમન્ત્રસ્ય
શ્રી દક્ષિણામૂર્તિઃ ઋષિઃ, પઙ્ક્તિશ્છન્દઃ,
શ્રીબાલાત્રિપુરસુન્દરી દેવતા, ઐં બીજં, સૌઃ શક્તિઃ,
ક્લીં કિલકં, શ્રીબાલાપ્રીતયે પાઠે વિનિયોગઃ ।

॥ ઋષ્યાદિ ન્યાસ ॥

ॐ શ્રી દક્ષિણામૂર્તિઋષયે નમઃ - શિરસિ ।
ॐ શ્રી પઙ્ક્તિશ્છન્દસે નમઃ - મુખે ।
ॐ શ્રીબાલાત્રિપુરસુન્દરી દેવતાયૈ નમઃ - હૃદિ ।
ॐ ઐં બીજાય નમઃ - નાભૌ ।
ॐ સૌઃ શક્તયે નમઃ - ગુહ્યે ।
ॐ ક્લીં કીલકાય નમઃ - પાદયોઃ ।
ॐ શ્રીબાલાપ્રીતયે પાઠે વિનિયોગાય નમઃ - સર્વાઙ્ગે ।

॥ કરન્યાસઃ ॥

ॐ ઐં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ॐ ક્લીં તર્જનીભ્યાં નમઃ ।
ॐ સૌઃ મધ્યમાભ્યાં નમઃ ।
ॐ ઐં અનામિકાભ્યાં નમઃ ।
ॐ ક્લીં કનિષ્ઠિકાભ્યાં નમઃ ।
ॐ સૌઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

॥ અઙ્ગન્યાસ ॥

ૐ ઐં હૃદયાય નમઃ ।
ૐ ક્લીં શિરસે સ્વાહા ।
ૐ સૌઃ શિખાયૈ વૌષટ્ ।
ૐ ઐં કવચાય હુમ્ ।
ૐ ક્લીં નેત્રત્રયાય વૌષતટ્ ।
ૐ સૌઃ અસ્ત્રાય ફટ્ ।

॥ ધ્યાન ॥

અરુણકિરણજાલૈ રઞ્જિતાશાવકાશા ।
વિધૃતજપવટીકા પુસ્તકાભીતિહસ્તા ।
ઇતરકરવરાઢ્યા ફુલ્લકહ્લારસંસ્થા ।
નિવસતુ હૃદિ બાલા નિત્યકલ્યાણરૂપા ॥

॥ માનસ પૂજન ॥

ૐ લં પૃથિવીતત્ત્વાત્મકં ગન્ધં શ્રીબાલાત્રિપુરાપ્રીતયે સમર્પયામિ નમઃ ।
ૐ હં આકાશતત્ત્વાત્મકં પુષ્પં શ્રીબાલાત્રિપુરાપ્રીતયે સમર્પયામિ નમઃ ।
ૐ યં વાયુતત્ત્વાત્મકં ધૂપં શ્રીબાલાત્રિપુરાપ્રીતયે ઘ્રાપયામિ નમઃ ।
ૐ રં અગ્નિતત્ત્વાત્મકં દીપં શ્રીબાલાત્રિપુરાપ્રીતયે દર્શયામિ નમઃ ।
ૐ વં જલતત્ત્વાત્મકં નૈવેદ્યં શ્રીબાલાત્રિપુરાપ્રીતયે નિવેદયામિ નમઃ ।
ૐ સં સર્વતત્ત્વાત્મકં તામ્બૂલં શ્રીબાલાત્રિપુરાપ્રીતયે સમર્પયામિ નમઃ ।

॥ મૂલ શ્રીબાલાસ્તોત્રમ્ ॥

વાણીં જપેદ્ યસ્ત્રિપુરે ! ભવાન્યા બીજં નિશીથે જડભાવલીનઃ ।
ભવેત સ ગીર્વાણગુરોર્ગરીયાન્ ગિરીશપત્નિ પ્રભુતાદિ તસ્ય ॥ ૧॥ var પ્રભયાર્દિ તસ્ય
કામેશ્વરિ ! ત્ર્યક્ષરી કામરાજં જપેદ્ દિનાન્તે તવ મન્ત્રરાજમ્ । var જપેદ્ રતાન્તે
રમ્ભાઽપિ જૃમ્ભારિસભાં વિહાય ભૂમૌ ભજેત્ તં કુલદીક્ષિતં ચ ॥ ૨॥

તાર્તીયકં બીજમિદં જપેદ્ યસ્ત્રૈલોક્યમાતસ્ત્રિપુરે ! પુરસ્તાત્ ।
વિધાય લીલાં ભુવને તથાન્તે નિરામયં બ્રહ્મપદં પ્રયાતિ ॥ ૩॥

ધરાસદ્મત્રિવૃત્તાષ્ટપત્રષટ્કોણનાગરે ।
વિન્દુપીઠેઽર્ચયેદ્ બાલાં યોઽસૌ પ્રાન્તે શિવો ભવેત્ ॥ ૪॥

॥ ફલશ્રુતિ ॥

ઇતિ મન્ત્રમયં સ્તવં પઠેદ્ યસ્ત્રિપુરાયા નિશિ વા નિશાવસાને ।
સ ભવેદ્ ભુવિ સાર્વભૌમમૌલિસ્ત્રિદિવે શક્રસમાનશૌર્યલક્ષ્મીઃ ॥ ૧॥

ઇતીદં દેવિ ! બાલાયા સ્તોત્રં મન્ત્રમયં પરમ્ ।
અદાતવ્યમભક્તેભ્યો ગોપનીયં સ્વયોનિવત્ ॥ ૨॥

॥ શ્રીરુદ્રયામલે તન્ત્રે ભૈરવભૈરવીસંવાદે
શ્રીબાલાત્રિપુરસુન્દરીસ્તોત્રમ્ ॥

Encoded and proofread by Pankaj Dubey dr.pankaj.dubey at gmail.com

.. Balatripurasundaristotram ..
was typeset using XƎLaTeX 0.99996
on May 21, 2017

Please send corrections to *sanskrit@cheerful.com*